णं। ठिअं।२१॥ आदीतौ बहुलं॥ स्त्रियां आकारांतादंतः स्थाने आत ई त इत्येतौ बहुलं प्रयोक्तव्यौ। सहमाणा। स
हमाणी। वेरवासणा। वेरवासणी। हलिद्दा। हलिद्दी। सुप्पणहा। सुप्पणही।२२॥ नपुंसके। प्रथमैकवचनेन पुंसके दीर्घ
त्वं न भवति। दहिं। मुहं। णाहं। धणं॥ हविं।२३॥ इञ्जस्शसोर्दीर्घश्च॥ नपुंसके वर्तमानयोर्जस्शसोः स्थाने इं इ ए
शो भवति। दीर्घश्च। वणाइं। दहीइं। नहूइं। वघेसाहिलाहत्वं।२४॥ नामंत्र्यात्सौ लत्वदीर्घौ विंदवः। आमंत्र्ये
मानेसौ परतः ओत्वदीर्घत्व विंदवो न भवंति। अतः ओत्वं। आसं। भुमि। भुषु दीर्घ इति दीर्घः। सो विंदु
र्नपुंसके। हेवण। हेदहि। हेमहु। हेम्मणा। हेवसु। हेवधू।२५॥ स्त्रियामातएत्॥ स्त्रियामामंत्र्ये आतः स्थाने ए

© Dharmartha Trust J&K. Digitized by eGangotri

त्वंभवति। सो परतः। हे माले। हे साले। आतस्य हल इति सो लोपः। २६। ईदूतोर्ह्रस्वः। आमंत्र्ये ईदूतोर्ह्रस्वो भवति
हे गोरि। हे वहु। २७। सोर्विंदुर्नपुंसके॥ नपुंसके वर्तमानस्य सोर्विंदुर्भवति। वणं। दहिं। २८। ऋत आरस्सुपि॥ ऋका
रांतस्य सुपि विभक्तौ परतः आर आदेशो भवति। भत्तारो सोहई। भत्तारं पेच्छसु। भत्तारेण। भत्तारेहिं। कत्तारो। कत्तारे ८ एवं २
ण। कत्तारेहिं। मातुरात्। मातृसंबंधिनो ऋकारस्याकारो भवति। माआ सोहई। माअं पेच्छसु। माआए कअं। माआ
ए ३०। उर्जस्शस्टाङस्सु प्सु वा। जस्शस्टाङस्सु सुप्सु परतः ऋकारस्य स्थाने उकारादेशो वा भवति जस् आ
कारांतत्वं वा स्यात्। भत्तुणो। भत्तारो। टा भत्तुणा। ङस् भत्तुणो। भत्तुस्स। सु भत्तुसु। आरादि पूर्ववत्। ३१॥
पितृभ्रातृजामातॄणामरः॥ पित्रादीनां सुपि परतः ऋत अरो भवति। आरापवादः॥ पिअरं पेच्छसु। पिअ
रेण। पिअरेहिं। भाअरं। भाअरेण। जामाअरं। जामाअरेण। जामाअरेहिं॥ आत्वं सौ। पित्रादीनाम् आका
रो भवति। सौ परतः ऋतः स्थाने वकारादेशः। पिआ। पिअरो। भाआ। भाअरो। जामाआ। जामाअरो। ३२॥ आ
त्मनो अप्पाणो वा। आत्मनो अप्पाण इत्यादेशो भवति। अप्पाणो। अप्पा। ३३॥ ब्रह्माद्याः अन्वत्॥ ब्रह्माद्याः

मा २

© Dharmartha Trust J&K. Digitized by eGangotri

यावद्वाः लक्षणानुसारेणानुगंतव्याः॥ आत्मवत्साधवो भवंति। उम्हा। उम्हाणो। जुवा। जुवाणो। अम्हा। अम्हा
णो। एवमादयो लक्षणानुसारेणानुगंतव्याः॥३५॥ ॥इति वररुचिकृते प्राकृतप्रकाशे लिंगानां विभक्त्यादेशः
पंचमः परिच्छेदः॥ ॥सर्वादेर्जस एत्वं। सर्वादेरकारस्य जस एत्वं भवति। सव्वे। ये। ते। के। कदरे।१॥ ङेः स्सिंम्मित्थाः। ङेः
सप्तम्येकवचनस्य सर्वादिपरतः स्थितस्य स्थाने स्सि म्मि त्थ इत्येते आदेशा भवंति। सवस्सिं। सवम्मि। सवत्थ॥
अ ईस्सि। इअम्मि। इअत्थ।२॥ इदमेतत्किंयत्तद्भ्यष्टा इणा वा। इदम् एतत् किं यत् तद् इत्येतेभ्यः टा इत्यस्य
इणादेशो वा भवति। इमिणा। एदिणा। किणा। जइणा। तइणा। पक्षे। इमेण। एदेण। केण। जेण। तेण।३॥ आ
मएसिं। इदमादिभ्यः परस्य आमः एसिं इत्ययमादेशो भवति। इमेसिं। इमाणं। एदेसिं। एदाणं। केसिं।
काणं। जेसिं। जाणं। तेसिं। ताणं।४॥ कियत्तद्भ्यो ङस आसः। किं यत् तद् इत्येतेभ्यः उत्तरस्य ङसः आस इत्ययमादे
शो वा भवति। कास। कस्स। जास। जस्स। तास। तस्स।५॥ ईद्भ्यः स्सासे॥ ईकारांतेभ्यः किमादिभ्यः उत्तरस्य ङसः स्सा
से इत्येतावादेशौ भवतः। किस्सा॥ कीसे। कीआ। कीए। कीअ। कीइ। जिस्सा। जीसे। जीआ। जीए। जीइ। ति

© Dharmartha Trust J&K. Digitized by eGangotri

तोए१ वा

स्सा। तीसे। तीआ। तीए। तीइ। ह्। डेर्हिं। किंयत्तद्भ्य उत्तरस्य ङेर्हिं इत्ययमादेशो भवति। कहिं। कस्सिं। कम्मि। कत्थ।
जहिं। जस्सिं। जम्मि। जत्थ। तहिं। तस्सिं। तम्मि। तत्थ। ७। आहे इआ काले। किंयत्तद्भ्यो ङेः काले आहे इआ इ(ति आदे)
तौ वा आदेशौ वा भवतः। काहे। जाहे। ताहे। कइआ। जइआ। तइआ। कहिं इत्यादयो ऽपि। ८। तो दो ङसेः। किंयत्त
तो४ द्भ्यो ङसेः स्थाने तो दो इत्येतावादेशौ भवतः। कत्तो। कदो। जत्तो। जदो। तत्तो। तदो। ९। तद्धो आश्च। तद उत्तरस्य ङसेः
ओकारादेशो भवति। तओ। तत्तो। तदो। १०। ङसासे वेति वर्त्तते। तदो ङसास ह से इत्ययमादेशो भवति। प
क्षे यथाप्राप्तं। से। तस्स। तस्स। ११। आमि सिं। तद आमा सह सिमित्ययमादेशो भवति। सिं। ताणं। १२। किं
मः कः। किमः सुप्यपि परतः क इत्ययमादेशो भवति। को। [illegible]। केण। केहिं। १३। इदम इमः। सुप्यपि परतः इ[illegible]
म इत्ययमादेशो भवति। इमो। इमे। इमेण। इमेहिं। १४। स्सस्सिमोर्ह्वा। स्स स्सिमो परतः इदम अ आदेशो भ[illegible]ति
अस्स। इमस्स। अस्सिं। इमस्सिं। ङेर्हः। १५। इदमोऽकारेण सह ङे स्थाने हकारादेशो भवति। इह। अ
स्सिं। इमम्मि। १६। न त्थः। इदम परस्य ङेस्त्थ इत्ययमादेशो भवति। ङेस्सिम्मित्थ इति प्राप्तः प्रतिषिध्यते
इह। इमस्सिं। इमम्मि। १७। नपुंसके स्वमोरिदमिणमिणमो। नपुंसकलिंगे इदमः स्वमोः परतः इ[illegible]

इमस्सिं२ इमे० स्सि२ च१

© Dharmartha Trust J&K. Digitized by eGangotri

सा।५

॥१५॥ इदं इणं इणमो इत्येते [illegible] वयश्चादेशा भवंति॥ इदं। इणं। इणमो। धणं। एतदः स्वावोत्वं वा॥ एतदः शावृत्यसोः प

रतः ओत्वं वा भवति। निसेत्रा सौ विकल्प्यते। एस। एसो। १९॥ त्तो ङसेः। एतदः परतः ङसेः त्तो इत्ययमादेशो भव शो।२

ति। एत्तो। २०। तदेतदोः। एतदः परस्य ङसेः त्तो इत्ययमादेशो भवति। एत्तो। एत्तोह्रो। एत्ताहु यस्स हिं। त्तो त्थ

योस्तो लोपः। एतदस्तकारस्य तो त्थयोः परतो लोपो भवति। एत्तो। एत्थ। ।तदेतदोः सावनपुंसके। तदेतदो स।४

स्तकारस्य पस्तकारस्तस्य स्कारादेशो भवति। अनपुंसके सौ परतः। सो पुरिसो। सा महिला। एसा। एसो

। एसा। अनपुंसक इति किं। तं धणं। एदं धणं। २२। अदसो दोमः। अदसो दकारस्य सुपि परतो म इत्ययमा

देशो भवति। अमू पुरिसो। अमू महिला। अमू बहुओ। अमू वणं। अमू इ। वणाइं। ह [illegible] असौ।

अदसो दकारस्य सौ परतो हकारादेशो भवति। अह पुरिसो। अह महिला। अह वणं। हादेशोयमोत्वं वि

२३ दृत्त्विव पिं बाधते। २४। पदस्याधिकारोयं। आशास्त्रविधानात् यदित ऊर्द्धमनुक्रमिष्यामः। पदस्य तद्भवतीति

तद्वेदितव्यं। तच्च तत्रैवोदाहरिष्यामः। २५॥ युष्मदस्तं तुवं। सावि सेव युष्मदः परस्य सौ परतस्तुतुन इत्येतावादे

शौ भवतः। तं आगदो। तुवं आगदो। तुमं वा पि। युष्मदः परस्य अमि तमं आदेशो वा भवति। तं तुवं वा तुत

© Dharmartha Trust J&K. Digitized by eGangotri

लिंगे पुपरत्वो३ स्प३ महिलाश्रा५ १५। रामं

वं ॰ पेछामि। तुमं पेछामि॥ २८॥ तुज्झे तुम्हे जसि। युष्मदः पदस्य जसि परतः तुज्झे तुम्हे इत्येतावादेशौ भवतः
तुज्झे आगदा। तुम्हे आगदा॥ २९॥ वो च शसि॥ शसि युष्मदः पदस्य वो आदेशो भवति। तुज्झे तुम्हे च। वो पेछा
मि। तुज्झे पेछामि। तुम्हे पेछामि॥ ३०॥ टाङ्योस्तइ तए तुमए तुमे। युष्मदस्तइ टाङ्योः परतः तइ तए तुमए तु
मे इत्येते आदेशा भवन्ति। टा। तइ। तए। तुमए। तुमे। कअं। ङि। तइ। तए। तुमए। तुमे ठिअं॥ ३१॥ ङसि तुमो तुह तु
ज्झ तुम्ह तुम्हाः। युष्मदः पदस्य ङसि तुमो तुह तुज्झ तुम्ह तुम्हा इत्येते आदेशा भवन्ति। तुमो पदं। तुह पदं। तुज्झ
पदं। तुम्ह पदं। तुम्हा पदं॥ ३२॥ आ ङिवत्ते दे। आ ङित्तती ये एकवचने ङसि च परतो युष्मदः पदस्य ते दे इत्येतावा
देशौ भवतः। ते कअं। दे कअं। ते धणं। दे धणं॥ ३३॥ तुमाइ च आङि युष्मदः पदस्य तुमाइ इत्ययमादेशो भव
ति। तुमाइ कअं॥ ३४॥ तुज्झेहिं तुम्हेहिं तुम्मेहिं भिसि॥ भिसि परतो युष्मदः पदस्य तुज्झेहिं तुम्हेहिं तुम्मेहिं॥ ३५॥
ङसौ तत्तो तइत्तो तुमादो तुमादु तुमाहि। ङसौ परतः युष्मदः पदस्य तत्तो तइत्तो तुमादो तुमादु तुमाहि इत्येते आ
देशा भवन्ति। तत्तो आगदो। तत्तो आगदो। तइत्तो आगदो। तुमादो आगदो। तुमादु आगदो। तुमाहि आगदो॥
॥ ३६॥ तुम्हाहिंतो तुम्हसुन्तो भ्यसि॥ युष्मदः पदस्य पंचमीबहुवचने भ्यसि तुम्हाहिंतो तुम्हासुन्तो इत्येतावा

© Dharmartha Trust J&K. Digitized by eGangotri

आम० शो भवतः। तुम्हाहिंतो। आगदो। तुम्हासुंतो आगदो।३७॥ वो भे तुम्हाणं तुम्हाण आमि सि। आमि परतः युष्म
३६॥ दः पदस्य वो भे तुम्हाणं तुम्हाण इत्येते आदेशा भवन्ति। वो धणं। भे धणं। तुम्हाणं धणं। तुम्हाण धणं।३८॥
16 डौ तुमम्मि। युष्मदः पदस्य डौ परतः तुमम्मि इत्ययमादेशो भवति। तुमम्मि ठिअं।३९॥ तुम्हेसु तुम्हासु सु
पि। युष्मदः पदस्य सप्तमी बहुवचने तुम्हेसु तुम्हासु इत्येतावादेशौ भवतः। तुम्हेसु ठिअं। तुम्हासु ठिअं।४०
अस्मदो हमहंअहअं सौ। अस्मदः पदस्य सौ परतः हं अहं अहअं इत्येते आदेशा भवन्ति। हं। अहं। अहअं।
४१॥ अहम्मि रम्मि च। अमि परतो अस्मदः पदस्य अहं इत्ययमादेशो भवति। अहं मि पेक्ख। अहमि करोमि।० भि ९
भि॥ मं ममं॥ अमीति वर्त्तते। अस्मदः पदस्य अमि परतो मं ममं इत्येतावादेशौ भवतः। मं पेक्ख। ममं पेक्ख।४२॥
अह्मे जस्शसोः। अस्मदो जस्शसोः परतः अह्मे इत्ययमादेशो भवति। अह्मे आगदा। अह्मे पेक्ख॥४४॥ णो श
सि। शसि परतो अस्मदः पदस्य णो इत्ययमादेशो भवति। णो पेक्ख।४५॥ आ ङि से मम माइ। आ ङि परतो
स्मदः पदस्य मे मम माइ इत्येतावादेशौ भवतः। मे मम माइ कअं।॥ ङौ च मइ मए। आङौ इत्यनुवर्त्तते। अ
कायां तृतीयायाञ्च अस्मदः पदस्य ङौ मइ मए इत्येतावादेशौ भवतः। कअं। मइ ठिअं। मए ठिअं।४६॥ अह्मे
हिं भिसि। अस्मदो भिसि परतो अह्मेहिं इत्ययमादेशो भवति। अह्मेहिं कअं।४७॥ मत्तो मइत्तो ममादो ममा

© Dharmartha Trust J&K. Digitized by eGangotri

तुमसाद्ङसौ।मत्तो मइत्तो ममदो ममादु ममाहि इत्येते आदेशा। अस्मदो ङसौ भवंति।मत्तो।मइत्तो।ममदो।ममादु
ममाहि आगदो।४८।अम्हाहिंतो अम्हासुंतो भ्यसि।भ्यसि परतो स्मदो अम्हाहिंतो अम्हासुंतो इत्येतावादेशौ भ
वतः।अम्हाहिंतो।अम्हासुंतो आगदो।४९।मे मम मह मज्झ ङसि।ङसि परतो स्मदो मे मम मह मज्झ इत्येते आदेशा भ
वंति।मे धणं।मम धणं।मह धणं।मज्झ धणं।५०।मज्झ णो अम्ह अम्हाण आमि।आमि परतो स्मदः मज्झ णो
अम्ह अम्हाण अम्हे इत्येते आदेशा भवंति।मज्झ धणं।णो धणं।अम्ह धणं।अम्हाण धणं।अम्हे धणं।ममम्मि ङौ।
अस्मदो ङौ परतो ममम्मि इत्ययमादेशो भवति।ममम्मि ठिअं।अम्हेसुं सुपि।अस्मदः सुपि परतो अम्हेसुं इत्ययमा
देशो भवति।अम्हेसु ठिअं।५३।द्वेर्दो।पदस्येति निवृत्तं।सुपीत्यनुवर्तते।सुपि परतो द्विशब्दस्य दो इत्ययमादेशो
भवति।दोसु ठिअं।५४।त्रेस्ती।।त्रिशब्दस्य सुपि परतो ती आदेशो भवति।तीहिं।तीसु।तिण्णि जस्शस्भ्यां जस्शसोर
इत्येताभ्यां सह त्रिशब्दस्य तिण्णि इत्ययमादेशो भवति।तिण्णि पुरिसा आगदो।तिण्णि पुरिसे पेच्छ।५५।द्वेर्दुवे णि वा। २७४
द्विशब्दस्य जस्शस्भ्यां सह दुवे दो णि इत्ययमादेशो भवति।तावादेशौ भवतः।वा।दुवे पुरिसा।दो।णि पुरिसा दो।कु
र्णांतीति शेषः।दुवे पुरिसे पेच्छ।दो।णि पुरिसे पेच्छ।५७।चतुरश्चत्तारो चत्तारि।चतुःशब्दस्य जस्शस्भ्यां सह चत्तारो
चत्तारि इत्येतावादेशौ भवतः।चत्तारो पुरिसा आगदा णंति।चत्तारि पुरिसा पेच्छ।चत्तारि पुरिसे पेच्छ।५८।एषामामो णहं॥

© Dharmartha Trust J&K. Digitized by eGangotri

इय चत्तारि पुरिसा आगदा णंति

१७॥ शषोर्हि। त्रिचतुरोरामाह्वानांमामस्थाने ण्हं इत्ययमादेशो भवति। दोण्हं धराणं। तिण्हं धराणं। चदुण्हं धराणं। परं॥ भिसो हं त
वत। भिसः सुप्ति चिरंतं तु वदुवति। अकारान्तात्भिसो हिं। इत्ययमादेशः एतु इकारोकारान्तादपि भवति। अग्गीहिं। वाउ
हिं। एवं मालाहिं। णईहिं। वहूहिं। अग्गिस्स। वाउस्स। अग्गीदो। वाऊदो। अग्गीदु। वाऊदु। एवं दो हिं। तिहिं। चदुहिं
॥२०॥ नङिङस्योरेदातौ। इकारान्तानां ङिङस्योः एदन्तवैकारोन भवतः। अग्गिम्मि। अग्गीदो। वाऊदो। अग्गीदु। वा
उदु। अग्गीहिं। वाऊहिं। २१॥ इम्यामसि। नेतिवर्तते। भ्यसि परतो इकारादीनां दीर्घो भवति। अग्गीहिंतो। वाउ
हिंतो। अग्गीसुंतो। वाऊसुंतो। द्विवचनस्य बहुवचनं। सर्वासां विभक्तीनां सुपां तिङां च द्विवचनस्य बहुवचनं प्रयो
क्तव्यं। वृक्षौ। वच्छा। वृक्षाभ्यां। वच्छेहिं। वृक्षाभ्यां। वच्छाहिंतो। वृक्षयोः। वच्छाणं। वृक्षयोः। वच्छेसु। तिङां यथा। तिष्ठ
तः। चिट्ठंति। २३॥ चतुर्थ्याः षष्ठी। चतुर्थीविभक्तेः स्थाने षष्ठी विभक्तिर्भवति। वंभणाणं देहि। वंभणाणं देहि॥ २४॥
इति सर्वनामपरिच्छेदः॥ ॥ तिप्तिपोरिदेतौ। तत्ति पइति तयोरेकवचनस्य स्थाने इत एत इत्येतावादेशौ भवतः॥
पढइ। पढए। सहइ। सहए। १॥ थासस्सिपोः सिसे। थास्सिप इत्येतयोः सि से इत्येतावादेशौ भवतः। पढसि। पढसे। सहसि
सहसे। २॥ इटू मिपो म्मि॥ इट् मिपोः स्थाने मि भवति। हसामि। पठामि। सहामि॥ ३॥ तिङ् स्थाने नोन्ता। बहुषु। बहुवर्त्त ४२
मानानां तिङां स्थाने न्ति हे इत्या आमो न्तु म इत्येते आदेशा भवंति। प्रथमपुरुषस्य। हसंति। पढंति। हसंति। मध्यमस्य

© Dharmartha Trust J&K. Digitized by eGangotri

पढह। पढित्था। उत्तमस्य तु यथा। पढामो। पढमु। पढम। अत एत्से। निसार्थं विवक्तं। पवतावि शेषणं। तथासो। एसे आदेशो अत ८
एव परो भवतः॥ नान्यस्मात् यमसः। पढए। एमसे। पढसे। अत इति किं होइ॥५॥ अस्ते लोपः। अस्ते इतो परतः स्थाने सिपो लोपो
भवति। सुणो सि। पुसि सो सि॥६॥ मिमोमानामधो हश्च॥ मिमोमानाम स्तेः परेषां मधो हकारश्चपो क्तव्यः। अस्तेश्च लोपः। ग
ओ म्हि। गच्छो म्हो। गच्छो म्ह॥७॥ यक ईअ इज्जौ॥ यकः स्थाने ईअ इज्ज आदेशौ भवतः। पठीअइ। पढिज्जइ। सहीअइ। सहिज्ज
इ॥८॥ नांत्यद्वित्वे। धातोर्यंत्यद्वित्वे सति यक ईअ इज्ज इत्येतावादेशौ भवतः। हस्सइ। गम्मइ। अमादौ नो विकल्पेन ...द्दि
त्तं॥९॥ न्तमाणौ शतृशानचोः। शतृशानचोः स्थाने न्त इत्येतयोरेकैकस्य न्तमाणौ इत्येतावादेशौ भवतः। पढन्तो। पढमाणो। हस
न्तो। हसमाणो। ई च स्त्रियां। स्त्रियां वर्तमानयोः शतृशानचोः ईकारादेशो भवति। चकारान्तमाणौ च। हसई। हसन्ती। हसमा
णा। वेवई। वेवन्ती। वेवमाणा॥ धातोर्भविष्यति हिः। भविष्यति काले धातोः परो हिः प्रयोक्तव्यः। होहिइ। हसिहिइ। होहि
न्ति। होहिन्ति। उत्तमे स्सा हा वा। भविष्यत्युत्तमे स्सा हा इत्येतौ प्रयोक्तव्यौ। चकाराद्धिश्च। होस्सामि। होहामि। होहिमि।
होस्सामो। होस्सामु। होस्साम इत्येवं। मिनास्सं वा। भविष्यत्युत्तमे मिना सह धातोः परः स्सं प्रयोक्तव्यः। होस्सं। हो
स्सामि। होहामि। होहिमि॥१३॥ ह्यं भूते। भूते काले धातोः प्रत्ययस्य ह्यं इत्ययमादेशो भवति। भविह्यं। होसि आसि॥१४॥
एकाचो हीअ॥ भूते काले एकाचो धातोः प्रत्ययस्य हीअ इत्ययमादेशो भवति। होहीअ॥१५॥ आसि अस्तेः
भूते काले एकस्मिन्नर्थे आसि निपात्यते। आसि सो। आसि अहं॥१६॥ णिच एदादेरत आत्॥ णिचः प्रत्ययस्य

© Dharmartha Trust J&K. Digitized by eGangotri

प्रा म
१८॥
18

कारादेशो भवति। आदेरकारस्य चात्वं भवति। करेइ। हासेइ। पाठेइ। १७॥ आवे च॥ णिच्यावे इत्ययमादेशो भवति। चका
रात्पूर्वोक्तं च। करावेइ। हसावेइ। पढावेइ। १८॥ अविक्कर्मभावे तु वा॥ णिच्यावि इत्यादेशो वा भवति क्तप्रत्यये परतः भावक
र्मणोश्च। करावितं। हसावितं। पठावितं। कारितं। हासितं। पाठितं। भावकर्मणोर्गत्ये करावीअइ। हसावीअ
इ। पठावीअइ। कारीअइ। हासीअइ। पाठीअइ। १९॥ अतआ मिपि वा॥ अकारान्ताद्धातो मिपि परतः आकारादेशो
भवति वा। हसामि हसमि। २०॥ इच्च बहुषु॥ मिपो बहुषु अत इकारादेशो भवति आ च। हसिमो। हसामो। हसिमु। हसा
मु। २१॥ क्ते॥ क्तप्रत्यये परतो अत इर्भवति॥ हसितं। पठितं। २२॥ क्त्वातुमुन्तव्यभविष्यत्सु॥ क्त्वातुमुन्तव्य इत्येतेषु
भविष्यति काले च अत इत्वं भवति। चकारात् एत्वं। हसेऊण। हसिऊण। हसेउं। हसिउं। हसिअव्वं। हसेअव्वं। हसेहि
इ। हसिहिइ। २३॥ लादेशे वा॥ लकारादेशे परतः अत एत्वं भवति वा। हसेइ। हसइ। पठेइ। पठइ। हसेति। हसति
। हसेउ। हसउ। २४॥ इति श्रीवररुचिकृते प्राकृतप्रकाशे तिङ्विधिर्नाम सप्तमः परिच्छेदः॥ ॥भुवो हो हुवौ॥ भू सत्ता
यामित्यस्य धातोर्हो हुव इत्येतावादेशौ भवतः॥ होइ। हुवइ। होन्ति। हुवंति। क्ते हू। क्तप्रत्यये परतो हू इत्ययमादेशो भवति।
हूअं। २॥ पादेर्भुवः॥ पादेरुत्तरस्य भुवो भवइत्ययमादेशो भवति। पभवइ। संभवइ। उब्भवइ। परिभवइ। ३॥ त्वरस्तुव
रः॥ ञित्वरा संभ्रमे अस्य धातोस्तुवर इत्ययमादेशो भवति। तुवरइ। ४॥ तेस्तुरः॥ क्तप्रत्यये तुर इत्ययमादेशो भवति॥
तुरिअं। घूर्णेर्घोलः॥ घुर्ण भ्रमणे अस्य धातोर्घोल इत्ययमादेशो भवति। घोलइ। ५॥ नुदेर्णोल्लः॥ णुद प्रेरणे अ

© Dharmartha Trust J&K. Digitized by eGangotri

स्य धातोः त्वोणि इत्ययमादेशो भवति। त्वोणाइ फल्लोरत्तइ॥७॥ दूङो दूमः। दूङ् परितापे अस्य धातोर्दूमो भवति। दूमइ।
पटेः फलः। अट पट गतौ अस्य धातोः फलो भवति। फलिअं। हिअअं। पटः पोलः। पट गतावित्यस्य धातोः पाल इत्या
देशो भवति। पालेइ॥८॥ हृषकृषमृषहृषामृतो अरिः। हृषादीनामृतः स्थाने अरिरित्ययमादेशो भवति। हृषः वरिस
इ। कृषः करिसइ। मृषः मरिसइ। हृषः हरिसइ॥९॥ अतो रः। ओकारान्तस्य धातोरन्तः स्थाने अर भवति। म्हा मरइ। स्मृ
गतौ। सरइ। हा वरइ॥१०॥ कृञः कुणो वा। डुकृञ् करणे अस्य धातोः प्रयोगे कुणो भवति वा। कुणाइ करइ॥११॥ जंभो जंभा
अलः। जभ जृभी गात्रविनामे अस्य धातोः जंभा अल इत्ययमादेशो भवति। जंभा अलइ॥१२॥ ग्लहे गेण्हः। ग्लह उपादाने
अस्य धातोर्गेण्ह इत्ययमादेशो भवति। गेण्हइ॥ घेत्क्वातुमुन्तव्येषु। ग्लहेर्घेत् इत्ययमादेशो भवति। क्त्वातुमुन्तव्येषु प
रतः। घेत्तूण। घेत्तुं। घेत्तव्वं॥१४॥ कृञः का भूतभविष्यतोश्च। भूतभविष्यतोः कालयोः कृञः का इत्ययमादेशो भवति॥
चात् क्त्वातुमुन्तव्येषु परतः। काहिअं। काहिइ। काऊण। काउं। काअव्वं॥१५॥ स्मरतेर्भरसुमरौ। स्मृ चिन्तायां अस्य धा
म७ तोर्भरसुमरौ भवतः। भरइ। सुमरइ॥१६॥ भियो भावीहौ। ञिभी भये अस्य धातोर्भा वीहो भवतः। भाइ। वीहइ॥
म्लैर्वावाअौ। म्लै गात्रविनामे अस्य धातोर्वा वाअ भवतः। वाइ। वाअइ॥१७॥ जिघ्रतेः पापाअ॥ जिघ्रतेः पापाअ इत्ययमादेशो पीतो २
भवतः। पाइ। पाअइ। तपस्तिप्पः॥ तप संतापे अस्य धातोस्तिप्पो भवति। तिप्पइ॥१९॥ ज्ञो जाणमुणौ। ज्ञा अ
वबोधने अस्य धातोर्जाणमुणौ भवतः। जाणाइ। मुणाइ॥२०॥ जल्पेर्लीमः। जल्प व्यक्तायां वाचि अस्य धातोर्लोका

स्पिमः २ स्त्रिस्थिमा २ १थिस्स२२ ग्र३

© Dharmartha Trust J&K. Digitized by eGangotri

२७॥ 19 कारस्य मकारो भवति। जम्बः॥ २१॥ छाधागाभ्यो ठञ्ज्रक्रोञ्जगाञ्जाः॥ छागतिनिवृत्तौ धेञ् चिंतायां। कै गै शब्दे इत्येतेषां
धातूनां ठा ञ्ज्र क्रा ञ्जा गाञ्ज इत्येते आदेशा भवंति। ठञ्जति। जाञ्जति। गाञ्जति॥ नस्तेर्ग्लिसः। ग्लस ग्लस अदने अ ६२
स्य धातोर्ग्लिसो भवति। ग्लिसः॥ २३॥ चिञ् ग्लिणः। चिञ् चयने। अस्य धातो णो भवति। चिणः॥ २४॥ क्रीञः कि
णः। डुक्रीञ् द्रव्यविनिमये अस्य धातोः क्रिणो भवति। किणः॥ २५॥ चेष्टेकेच। वेरुत्तरस्य क्रीञ्‌ञ्के आदेशः। किणो द
क्रि५ शम्भ भवति। विक्रेः। विणः॥ २६॥ उरुः धमउह्मा। ध्मा शब्दाग्निसंयोगयोः। अस्य धातो रुत्तरस्य उह्मा भव
ति। उह्मा॥ २७॥ स्वरो धोदृः। स्वरुत्तरस्य दुधाञ् धारणपोषणयोः। अस्य धातो दृ आदेशो भवति। स्व
दृः॥ स्वदृ॥ २८॥ अवाद्गाहेर्वाहः। गाहू विलोडने अस्य धातो अवादुत्तरस्य वाहादेशो भवति। अवाहः। अव
वाहः॥ २९॥ काशेर्वा सश्च अवादुत्तरस्य दिल्सेनुवर्त्तते। काशृ शब्दकुत्सायां अस्य धातो रवादुत्तरस्य वासादेशो भ
वति। अवासः॥ ३०॥ निरो माङो माणः॥ माङ् माने अस्य धातोरवादुत्तरस्य वासो भवति। उवासः। निरुत्तरस्य
माणादेशो भवति। निर्माणः॥ ३१॥ क्षिपो भिक्षुः। क्षिप प्रेरणे अस्य धातोः भिक्षुरो भवति। भिक्षुः॥ ३२॥ भिदि
छिदोरत्तसन्दः॥ भिदिर् छिदिर् द्वैधीकरणे अनयोरत्तसन्दो भवति। भिन्दः। छिन्दः॥ ३३॥ क्वथेर्ढः॥ क्वथ निष्पाके। अस्य धातोरंतस्य
ढो भवति। कढः॥ ३४॥ वेष्टश्च॥ वेष्ट वेष्टने। अस्य धातोरंतस्य ढो भवति। वेढः। योगविभाग उत्तरार्थः॥ ३५॥ उ

© Dharmartha Trust J&K. Digitized by eGangotri

स्समोल्लः॥ उत्सम्भ्यामुत्तरस्य वेष्टेरंतस्य ल्लो भवति। उवेल्लइ। संवेल्लइ॥४६॥ रुदेर्वः॥ रुदिर् अश्रुविमोचने। अस्य
धातोरंत्यस्य वो भवति। रुवइ॥४७॥ उदो विजः॥ उत्पूर्वस्य विजेरंतस्य वकारो भवति। उव्विवइ॥४८॥ वृधेर्ढः॥ वृधु
वर्धने अस्य धातोरंत्यस्य ढो भवति। वड्ढइ॥४९॥ हतेर्म्मः॥ हतेरंत्यस्य म्मो भवति। हम्मइ॥५०॥ तुषादीनां दीर्घता॥
तुषादीनां दीर्घता भवति। तूसइ। तूसइ। रूसइ॥ व्रजो व्रजनृत्योः॥ व्रजती अनयोरंत्यस्य च्चो भवति। वच्चइ। णच्चइ
॥५२॥ युधिबुध्योर्ज्झः॥ युधि संप्रहारे बुध अवबोधने अनयोरंत्यस्य ज्झो भवति। जुज्झइ। बुज्झइ॥५३॥ रुधेर्न्धम्भौ॥
रुधिर आवरणे अस्यान्त्यस्य न्धम्भौ भवतः। रुन्धइ। रुम्भइ॥५४॥ मृदो लः॥ मृद क्षोदने अंत्यस्य लो भवति। मलइ॥५५॥ स्त्रल्प तो६
शदपतोर्डः॥ शद्लृ शातने पत्लृ पतने अनयोरंत्यस्य डो भवति। सडइ। पडइ। शकादीनां द्वित्वं॥ शक्लृ शक्तौ इत्ये
वमादीनां द्वित्वं भवति। सक्कइ। लग्गइ॥५६॥ स्फुटिचल्योर्वा॥ स्फुटि विकसने। अनयोरंत्यस्य वा द्वित्वं भव
ति। स्फुट्टइ। फुडइ। चल्लइ। चलइ॥५८॥ आदेर्मीलः॥ आदेः सकिरकिलाइ इत्येतेषामादावनिर्दिष्टतारख्याने॥
निपातसंज्ञका भवंति। पेच्छइ इत्येवमादौ अक्काविरतेन क्वसि। अच्च किलसि विणा इति रंत्यस्य मीलो द्वित्वं वा भ
पमील्लइ। पमीलइ॥५८॥ भुजादीनां क्त्वातुमुन्तव्येषु लोपः॥ भुज इत्येवमादीनां क्त्वातुमुन्तव्येषु परतो
लोपो भवति। भोत्तूण। भोत्तुं। भोत्तव्वं। विदः॥ वेत्तूण। वेत्तुं। वेत्तव्वं। रुदः॥ रोत्तूण। रोत्तुं। रोत्तव्वं॥ ५०॥ भुजि
चलचलने केयनहूणिच्छ॥

© Dharmartha Trust J&K. Digitized by eGangotri

लधूवाणोंत्यह्रस्वः॥ श्रु श्रवणे। हु दाने। जि जये। लूञ् छेदने। धूञ् कंपने। एषां अंत्यस्य णत्वो ह्रस्वः। दीर्घस्य ह्र
स्वो भवति। सुणइ। हुणइ। जिणइ। लुणइ। धुणइ॥ ५१॥ भावकर्मणोर्व्वश्च। एषां भावकर्मणोरंते व्वा वृ
द्धयोन्त्यस्य चकारान्नाण। सुव्वइ। सुणिज्जइ। जिव्वइ। लुव्वइ। जिणिज्जइ। लुणिज्जइ॥ ५२॥ गमादीनां द्वित्वं
वा। गमादीनां धातूनां द्वित्वं वा भवति। गम्मइ। गमिज्जइ। रम्मइ। रमिज्जइ। हस्सइ। हसिज्जइ॥ ५३॥ लिहेर्लि
ज्झः। लिह आस्वादने अस्य धातोः लिज्झो भवति। लिज्झइ॥ ५४॥ हृकोर्हीरकीरौ। हृञ् हरणे। डुकृञ् करणे।
अनयोः हीरकीरौ भवतः। हीरइ। कीरइ॥ ५५॥ स्निहेर्दिश्वो वा। स्निह धातोर्धातोः दिश्वो भवति। भावकर्मणोरप्य
ले६ योः। णहिज्जइ। णाहिज्जइ॥ ५६॥ नदिसाद्यः। दिहाद्य सेव नाद्य एकाश्रयपेन सह निपात्यते। डुवज् नद्याने।
छिण्णो। कढिः। रुण्णो। अणिमिहिस्सो। दद्हुटं। रत्तिणत्तं॥ ५७॥ खिदेर्विसूरः। खिद दैन्ये अस्य विसूरो भवति।
विसूरइ निरहेण। विसूरइ बाला॥ ५८॥ क्रुधेर्जूरः। क्रुध कोपे अस्य जूरो भवति। जूरइ॥ ५९॥ वर्द्धेर्वड्ढः।
वर्द्ध छेदने अस्य धातोर्वड्ढो भवति। वड्ढइ॥ ६०॥ त्रसेर्वज्जः। त्रसी उद्वेगे अस्य धातोर्वज्जो भवति। वज्ज
॥ ६१॥ मृजेर्लुभसुपौ। मृजू शुद्धौ। अस्य धातोर्लुभसुपौ भवतः। लुभइ। सुपइ॥ ६२॥ वुडुखुप्पौ मस्जेः। टुम
स्जो शुद्धौ अस्य धातोर्वुडुखुप्पौ भवतः। वुडुइ। खुप्पइ॥ दृशोः पुलिअणि अक्क अवकथाः॥ दृशेर ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अस्य धातोः पुलआणिः अक्क अवक्क वा भवति। पुलअइ। णिक्केअइ। अवरअवइ॥ ६३॥ शकेस्तवचतीरः
। शाक्नुयात्कौ॥ अस्य धातोः स्तवर अरातामइ इत्येते आदेशा भवति। तरइ। चअइ। रइ। वीरइ॥ ६४॥ शेषाणामं
दन्तता। शेषाणां लुप्तवंधानामदन्तता भवति। अकारान्ता वढ्वतीत्यर्थः॥ रमइ। चुवइ॥ ६५॥ ः॥ ॥
इति श्रीवररुचिकृते प्राकृतप्रकाशे धात्वादेशपरिच्छेदः॥ ८॥ ॥ निपाता अधिकारोऽयं। वक्ष्यमाणा
निपातसंज्ञका वेदितव्याः। संस्कृतानुसारेण निपातकार्यं कर्तव्यं। हुं दानपृच्छानिर्द्धारणेषु॥ हु
मित्यय शब्दो दानपृच्छानिर्द्धारणेष्वर्थेषु निपातसंज्ञको भवति। हुं गेण्ह। अप्पणो जाव्व। पृच्छायां।
हुं साहसु सब्भावं। निर्द्धारणे। हुं हुवसु तुण्हिको॥ १॥ वि अवे अवधारणे। चि अ वे अ इत्येतौ अवधा
रणे निपातसंज्ञकौ भवतः। एवं विअ। अवधारणे। एवं वेअ॥ २॥ ओ सूचनापश्चात्तापविकल्पेषु॥ ओ प३
इत्ययं शब्दो सूचनापश्चात्तापविकल्पेषु निपातसंज्ञको भवति॥ ओ विरअमि। गाथ्या मुहहुव्वः॥ ३॥
इर किर किल निश्चिताख्याने। इर किर किल इत्येते शब्दा अनिश्चिताख्याने निपातसंज्ञका भवन्ति॥

© Dharmartha Trust J&K. Digitized by eGangotri

सं
प्रा०म०
२१॥
२१

पेच्छइ रतेण हे॥ अज्ज किं तेन ववसिअं॥ अं किल सि विणए॥३॥ हुं खु निश्चयवितर्कसंभावनासु नि
पातसंज्ञौ भवतः॥ णवर केवले॥ णवर एतत् केवलेर्थे निपातसंज्ञकौ भवतः॥ णवर अस्स॥५॥ आनंतर्ये णा
वरि॥ णवरि सद्यःशब्दः आनंतर्ये निपातसंज्ञको भवति॥ णवरि अस्स॥६॥ अव्वो दुःखसंभावनासूचनेषु॥ अव्वो
इत्ययं शब्दो दुःखसूचनासंभावनेषु निपातसंज्ञो भवति॥ दुःखे। अव्वो कज्जल [illegible] रंजिएहिं॥ अव्वो अवहरवि
रअं॥ अव्वो णमिवाण्णु॥७॥ अलाहिं निवारणे॥ अलाहिं इत्ययं [illegible] शब्दो निवारणे निपातसंज्ञो भवति॥ अल
२ अते हिः हिं कल असे सने॥ अलाहिं किं अलंबंधणेण॥८॥ अइ वले संभाषणे॥ अइ वले इत्येतौ शब्दौ निपातसंज्ञकौ भवतः॥
अप्रमूलं। वस्ससु हवे किं। क[illegible] अलहु अवले॥९॥ माविवेपरीत्ये॥ माविइत्ययं वेपरीत्ये निपातसंज्ञको भवति २४
णाविणहपहसि अवाला॥१०॥ कुलमाणां॥ इत्ययं शब्दो कुल्मायां निपातसंज्ञको भवति। [illegible]॥११॥ अ
रे हिरे संभाषणरतिकलहाक्षेपेषु॥ रे अरे हिरे इत्येते शब्दाः संभाषणरतिकलहाक्षेपेषु निपातसंज्ञका भवंति॥ प
थ्यासंरमा रेपथा। माकारे हिरेपथा। हिरेपथा॥ णा ओ सिरि हिरे॥१२॥ मिव पिव विव व्व इवार्थे॥ मिव मिव विव
इत्येते शब्दा निपातसंज्ञका भवंति॥ अणं मिवावातं मिअ ग अणं विवसे केणं॥१३॥ शेषः संस्कृतात्॥ उक्तादन्य

संभाषणो६

२१॥
राम०

© Dharmartha Trust J&K. Digitized by eGangotri

छेषः। चसयसमासतद्धित लिंगवर्णोकादिविधिशेषः संस्कृतादवगंतव्यः। इह ग्रंथविस्तरभयान्न दर्शितं
॥१४॥ ॥इति वररुचिकृते प्राकृतप्रकाशे निपाताधिकारो नवमः परिच्छेदः॥९॥ ॥पैशाची पिशाचानां भाषा पै
शाची। सा च लक्ष्यलक्षणाभ्यां स्फुटीक्रियते। प्रकृतिः सौरसेनी॥ अस्याः पैशाच्याः प्रकृतिः सौरसेनी। स्थिता
यां सौरसेन्यां पैशाचीलक्षणं कर्तव्यं। वर्गाणां तृतीयचतुर्थयोर्वर्णयोरयुजोरनाद्ययोराद्यौ। वर्गाणां तृ
यचतुर्थयोर्वर्णयोरयुजोरनाद्ययोर्वर्तमानयोः स्थाने प्रथमद्वितीयौ भवतः। गकनं। मेखो। राचा॥
त६ निक्कुरो। वटीसं। दस्यावेंनं। वतनो। माधवो। मस्या। गोपितो। केसयो। सपथं। सफला। गगनं। मेघो। राजा। वि
जो र वडीसा दशवदन वदन माधव वध्वा गोविंद केशव सपथ सफलाभाः। अयुजोरिति किं। संगामो। वन्धो
इत्यादि। अनादाविति किं। गमनं गकनं। इत्यादि॥ इवस्य पिवः॥ इवशब्दस्य स्थाने पिव इत्ययमादेशो भवति
कमलं पिव मुखं। णो नः। णकारस्य स्थाने नकारादेशो भवति। तनुनी। ष्टस्य सटः। ष्टस्य स्थाने सट इत्यय
मादेशो भवति। कसटं मम वट्टि। स्नस्य सनः। स्न इत्यस्य स्थाने सन इत्ययमादेशो भवति। सनानं। र्यस्य
रियः। र्यस्य स्थाने रिय इत्ययमादेशो भवति। भारिया। ज्ञस्य ञ्ञः। ज्ञ इत्यस्य स्थाने ञ्ञ इत्ययमादेशो भवति

© Dharmartha Trust J&K. Digitized by eGangotri

अः१

यिञ्ञाउ तः सवञ्ञो। कन्यायां न्यस्य। कन्याशब्दे न्यस्य स्थाने ञ्ञ इत्ययमादेशो भवति। कञ्ञ। सव्वञ्ञ॥ ञ्ञशब्द
स्य सौ रसेना साधितस्य ञ्ञ इत्ययमादेशो भवति। कञ्ञ। राज्ञो राचि टा ङसि ङस् ङि ष्वा। राजन शब्दस्य
टा ङसि ङस् ङि इत्येतेषु परतः राचि इत्ययमादेशो भवति। राचिणा। राचिनो। एतेष्विति किं। राचा। राचाणं
स्नुत्वे। क्त्वस्तूनं। क्त्वाप्रत्ययस्य स्थाने तूनं इत्ययमादेशो भवति। सुनाहि। सुना। घुटाटी नि किं। सुनवि। सि
टइति किं। चवनतु। हृदयस्याहितयकं। हृदयशब्दस्याहितयकं निपात्यते। हितयकं हरसि मे तं तु नि॥ इति श्री
वररुचिकृते प्राकृतप्रकाशे पैशाचिको नाम दशमः परिच्छेदः॥ १०॥ अथ मागधी॥ प्रकृतिः शौर
सेनी। षसोः शः। षकारसकारयोः स्थाने शकारो भवति। शशे। माशे। विलाशे। जो यः। जकारस्य यका
रो भवति। यायदे। जायते। चवर्गस्य स्पृष्टता तथोच्चारणः। चवर्गीय यथा स्पष्टो उच्चारणो भवति। परिचञ्च
गृहित् कलो। विजले। णिञ्चले। हृदयस्य हडक्कः। हृदयस्य स्थाने हडक्को भवति। हडक्के ममाल ल ममायि
र्योर्य्यः। र्यकारर्जकारयोः स्थाने य्यो भवति। कय्यं। दुय्यणे। ष्कस्य स्कः। ष्कस्य स्थाने स्ककारो भवति। शु
स्कशे। लस्कशे। अस्मदः सौ हके हगे। अस्मदः स्थाने सौ परतः हके हगे इत्येतौ स्तः। हके भणामि। हगे भणामि
अतइदेतौ लुक् च। सौ इत्यनुवर्तते। अकारान्तात् क्लीबात् सौ परतः इकारएकारौ भवतः। पस्ले। पस्ल्ले। एशे पुलिशे।

© Dharmartha Trust J&K. Digitized by eGangotri

आ॥ एससे पुलिसा। एसो पुलिसो। एशा पुलिशा। एशा नमा॥ क्तांताद्रश्च। क्त वतयोः तान्तात् परतः उकार
श्च भवति। चकारादेतौ लुक्। हसिदु। हसिदि। हसिदो। हसिदा। ङसो हो वा दीर्घत्वं च। ङसः षष्ठी एकवचनस्य स्थाने हका
देशो भवति वा। तत्संयोगे च दीर्घत्वं। पुलिसा हो। पुलिसस्स धरो। अदीर्घः संबुद्धौ। अदन्तादिसे वा। अदन्ता
दकारो दीर्घो भवति संबुद्धौ। पुलिसा आगच्छ। मणुशा आगच्छ। संबुद्धाविति किं। वंभणस्स धरो। चिठ्ठस्य चिष्टः।
चिठ्ठस्य धातोः स्थाने चिष्ठ इत्ययमादेशो भवति। पुलिसो चिष्ठदि। कगडतां डः। कृञ्गमां क्तस्य डः। डुकृञ् करणे। गम्लृ गतौ। एषां क्तप्रत्ययस्य डकारो भवति। कडे मडे गडे। क्त्वो दाणि॥ क्त्वा प्रत्ययस्य स्थाने दाणि रित्ययमादे
शो भवति। सहिदाणि। गडे। सो दु आगवः। शृगालस्य शिआलाशिआलौ। शिआलो। शिआलकः। शृगालशब्दस्य स्थाने शिआ
ला शिआल इत्यादेशा भवंति। शिअ आला अच्छदि। शिआले आच्छदि। शिअला आके। आअच्छदि॥ ॥इति श्रीवररुचि
कृते प्राकृतप्रकाशे मागधी विभाषो नामैकादशः परिच्छेदः॥ ११॥ ॥अथ सौरसेनी। प्रकृतिः संस्कृतं। अनादावयु
जः। तथयोर्दधौ। व्यापृते डः। पुत्रो कश्चित् इदुगतौ। ग्ध धसमेषु। क्षस्तव्यपविरुषपन्न कन्यकानां ञ्ञोवा। सर्वङ्गितयो
र्णः। क्वा इअ। गमो डुअ। णि जेस्सी सो वी क्वावे स्वरदीर्घश्च। भो मुधि स्तडि। नत्थि। तदा। तदो। इदस्य लदिहं। डु कृञ्म ओ २

डि. १ डि। हिः १

© Dharmartha Trust J&K. Digitized by eGangotri

॥प्र०॥

॥२३॥

23

न्यद्धिः२

कसः स्य पश्चिम्बयं॥ स्मरते स्तुमरः॥ दृसेः पेक्खः॥ अस्तेरकः स्सि पायो॥ भविष्यति॥ निपा संवा रव रद्दी विलं च॥
स्त्रियां इत्थी॥ एवस्य व्वे च॥ इवस्य विअ॥ अस्मदो जसा वअं च॥ सर्वनाम्नां ङसिल्दोः॥ धातोर्भावे कत्व कर्म
स्तुपरस्मैपदं॥ अनन्ते एव्व॥ मिपो लेट्टिव॥ आक्खस्य पेस्सा छो भेऊ॥ प्रकृतो दण्ड्याने च॥ शेषं महाराष्ट्रीवत्॥
॥ ॥ ॥इति श्रीवररुचिकृते प्राकृतप्रकाशे मनोरमावृत्तौ सौरसेनी लक्षणो द्वादशः परिच्छेदः॥ ॥ ॥२३॥

८००

प्रा०

६५
२८

© Dharmartha Trust J&K. Digitized by eGangotri